श्रद्धाविश्वासयुक्तीनामाधुनिकविचारविमर्शः

Dr. K.N. Harikrishna Sarma
Asst. Professor, Sree Sankara College, Kalady

कालोऽयं विविधैः सामाजिकैः धार्मिकैश्च आशयसंग्रामैः कलुषितो वर्तते । आशयेषु लब्धजन्मानः इमे सङ्ग्रामाः शनैः व्यक्तीनां समाजानाञ्च मिथः सङ्ग्रामाय निदानभूताः । तादृशेषु संग्रामेषु क्वचिन्मध्यवर्तिनः क्वचिदायुधस्य वा रूपेण भौतिकशास्त्रं तदनुगुणयुक्तयश्च अनुप्रविष्टाः । तस्य भौतिकशास्त्रस्य पाश्चात्येषु लब्धप्रतिष्ठस्य प्रसारेण विज्ञानमण्डले नैके भेदाः परिवर्तनानि परिणामाश्च समापन्नाः । तथा भौतिकैकप्रमाणवादिनः तदन्याश्चेति जिज्ञासवो अध्येतारश्च द्विधा विभक्ताः । तत्र वैदिकभौतिकयोरुभयोरपि प्रमाणयोः अङ्गीकर्तारः विश्वासिनः भौतिकप्रमाणैकभाजाः युक्तिवादिनश्चेति कीर्तिताः। कालान्तरे युक्तिवादिनः परिष्कृताः, विकांसकाक्षिणः, धर्मेतराः, मानविकतायाः समत्वस्य च समुज्ज्वलस्य आदर्शस्य स्वरूपभूताः इत्यभिषिक्ताः । विश्वासिनस्तु प्राकृतप्राचीनाः, अनागरिकाः, बुद्धिहीनाः, विकासविरोधिनश्चेति आक्षिप्ताः । अनयोः अभिषेकाक्षेपयोः प्रग्रहस्थाने युक्तिविश्वासरूपं द्वन्द्वमेवावर्तत । द्वन्द्वन्नाम विरुद्धानुभवयुतं भेदभावितं वाऽनुभूतिद्वयं वस्तुद्वयं वा सुखदुःखशीतोष्णादिकं पापपुण्यादिकं वा । युक्तिविश्वायावपि न वेति विचार्यते ।

युक्तिविमर्शः

युज् समाधौ इति धातोः युक्तिरिति पदं निष्पन्नम् । आङ्गलेयाः सामान्येन logic *इति भणन्ति । भारतीयदर्शनानि इमां युक्तिं प्रमाणविचारेऽधियन्ति । यथार्थज्ञानरूपायाः प्रमायाः करणेषु प्रमाणेषु युक्तेरद्वितीयं स्थानं वर्तते । प्रत्यक्षानुमानागमोपमानार्थापत्त्यनुपलब्धादिषु प्रमाणेषु सर्वेष्वपि युक्तेर्विमर्शं द्रष्टुं शक्यते। तत्रैव अनुमानप्रमाणस्य नामान्तरं युक्तिरिति वैशिष्ट्यम् । श्रवणस्य षड्विधलिङ्गेषूपक्रमोपसंहाराभ्यासपूर्वताफलार्थवादोपपत्तिषूपपत्तिर्युक्तिः । हेतुदर्शनेन साध्यावगमरूपतायामनुमायां हेतुसत्तवे साध्यसत्त्वरूपा व्याप्तिः युक्तिः । यत्र धूमः तत्र वह्निरिति युक्तेराद्यभागः*

। तथा वह्नेः सत्त्वं धूमसत्त्वायापि योग्यमिति द्वितीयः भागः । किन्तु सर्वत्र वह्नौ सति धूमो न स्यादिति वास्तवम् । सेयं युक्तिः उपाधिरूपयुक्त्यन्तरकल्पनया प्रस्तूयते । एवं वस्तुद्वयस्य वस्तुताद्वयस्य वा मध्यवर्तिनं कमपि सम्बन्धमाधारीकृत्य संपद्यमाना निगमनप्रक्रिया युक्तिविचारः इति कीर्त्यते ।

प्राचीनाः यवनचिन्तकाः सोक्रट्टीस्, प्लेटो, अरिस्टोटिल्, प्रभृतयः अर्वाचीनाः कान्ट्, रस्सल्, चोंस्की, हेगल् प्रभृतयश्च युक्तिविचारविमर्शनपटवः आसन् । क्रिस्तोः परं चतुर्थशतकादारारभ्य ऊनविंशतिशतकपर्यन्तं यवनचिन्तायाः प्रभावः पाश्चात्यतत्त्वचिन्तासरणीं प्रवर्तयन्नासीदित्यवगन्तुं शक्यते । तत्र अरिस्टोटिलस्य लोजिक् इति परिकल्पनया विमर्शकोटिमारूढा अभवत् । तेषां युक्तिचिन्ताविमर्शनानां समाहारः ओर्गानोण् इति नाम्नि ग्रन्थरूपेण प्रथामवाप्तः । ओर्गानोण् इति पदस्य उपकरणमित्यर्थः । युक्तिस्तावत् तत्त्वचिन्तायाः उपकरणभूतेति समुद्दिष्टम् । या तर्कमुक्तसरणी यवनैरनुगता सा डयलक्टिक्स् इति प्रथिता अर्वाचीनतत्तवचिन्तापद्धितिष्वपि दरीदृश्यते। सर्वथापि युक्तिः प्रामाणिकस्य कस्यचन ज्ञानस्यावाप्तय अवश्यमाश्रयणीयः कश्चन सम्ब्धनियम एवेति दृश्यते ।

'नवीना अवश्चंभाव्या च तर्कचिन्ता युक्तिः "[1]इति अरिस्टोटिल् अभिप्रैति । "व्यापारोपेण व्यापकारोपस्तर्कः[2]" "व्यभिचारशङ्कानिर्वर्तकस्तर्कः"[3] इत्यादयः तर्कस्वरूप निर्णयपराः व्याख्यानविशेषाः भूर्युपलभ्यन्ते । अरिस्टोटिलस्य तर्कनिर्वचने प्रत्यक्षप्रमाणेऽतिव्याप्तिवारणाय 'नवीन'पदप्रयोगः । व्याघातादिनिवारणाय 'अवश्यं भावीति' पदमपि प्रयुक्तम् । तमिमं सङ्कल्पमाधारीकृत्य या युक्तिचिन्ता 'लोजिक्' इति भावनायां विकासमवाप्ता, सा पुनः औपचारिकयुक्तिः अनौपचारिकी युक्तिः प्रतीकात्मकयुक्तिः , गणितीययुक्तिः इत्येतैर्नेकैर्भेदैर्विभक्ता । असङ्गतत्त्वादविस्तार्याः इमे।

पाश्चात्यपौरस्त्यादिभिदां विनैव युक्तिः स्वतन्त्रः कश्चित् रीतिशास्त्रोपकरणविशेषः इति गम्यते । न सा केनचिद्धर्मेण दर्शनेन वा विधेयत्ववती वर्तते । अपि च सा युगपद्वस्तुनिष्ठेष्वात्मनिष्ठेषु वा निगमनेषु व्याप्नुवन्ती दृश्यते । अर्वाचीनैर्ज्ञानस्य वस्तुनिष्ठत्वं आत्मनिष्ठत्वं वा भेदं प्रकल्प्य वस्तुनिष्ठस्य प्रामाण्यम्

इतरस्याप्रामाण्यं चेति यो वादः उन्नीयते न सः युक्तिसम्मत इति गम्यते । ऐन्द्रियस्य ज्ञानस्य युक्तेः प्रमाणपत्रमवश्यं भाव्येवेति भावः । व्चस्पत्ये त्वेवमुद्धियते- 'युक्तिरर्थावधारणम् .... ' तत्र न्याये " श्रुत्योर्विरोधे न्यायस्तु बलवानर्थनिर्णये । युक्तिहीनविचारे तु धर्महानिः प्रजायते।" इति । युक्तिरनुमानमिति सामान्येनानुमानपक्षे पौरस्त्यदार्शनिकैर्युक्तिः परिगण्यते। सा तु निरन्तरनिरीक्षणशोधनमननादिभिः क्षीरान्मथनेन नवनीतोद्गम इव समुद्धियमाणा इत्यतोऽनुभवप्रमाणान्यपि वर्तते । अत एव सर्वेषु प्रमाणेषु प्राच्यैः युक्तिः प्रयुज्यमाना दृश्यते ।

विश्वासः

युक्तिर्यथा स्पष्टेन निर्वचनेन व्यज्यते, न तथा विस्पष्टलक्षणो विश्वासः । अस्य पदस्यार्थानर्थे लोकैर्नितरां व्यवहारायोपयुज्येते । वार्तमानिकसमाजघटनासु नायकस्थाने प्रतिनायकस्थाने च विराजमानोऽयमव्यक्तार्थवत्वार्थवत्वाद्विरुद्धकोटिमारूढः । विस्वासपदस्यार्थकल्पनायां न केवलं व्याकरणं किन्तु सामाजिकानि परिवर्तनान्यपि हेतुत्वं भजन्ते । तत्र सामान्यतया एकार्थत्वेपि विशेषेषि वैरुद्ध्यानि सयुः । ईश्वरविश्वासः स विश्वासो योग्यो वा 'न मेऽशुभान्त्ये विश्वासः ' इत्यादिष्वर्वाचीनेषु प्रयोगेषु भक्तिः, कापट्यराहित्यम्, प्रतीक्षा इत्याद्यर्थाः निक्षिप्ताः । अर्वाचीनैः कल्पिते धार्मिकेऽर्थे प्राचीनभारतपरम्परासु पदमिदं न प्रसिद्धमिति दृश्यते। ईश्वरे देवतासु वा या आस्तिक्यबुद्धिर्वर्तते सैव विश्वासशब्देन धर्मप्रकरणेष्वर्वाचीनैरुद्दिश्यते । नवीनानां क्रिस्तु-मुहम्मन्मतादीनामाविर्भावात्परमेव विश्वासस्य दैविकी आस्तिक्यबुद्धिरित्यर्थो विवक्षितः । सनातनभारतीयधर्मान्तरेण कस्मादपि प्रवाचकादारभ्य एकशिलात्मकां कामपि शैलीमनुवर्त्य एकमेव ग्रन्थमाधारीकृत्य च ये धर्माः प्रचलिताः तेऽधुना 'सेमिटिक्' धर्मा इति प्रस्तुताः । तादृशेषु धर्मेषु क्रैस्तव-मुहम्मदीयेषु मतेषु 'विश्वास' पदस्य प्रसिद्धिः अन्यूना भवति । बौद्धधर्मो तावन्नैवं परिकल्प्यते। एतेषां धर्माणामाविर्भावात्परं हिन्दुधर्मानुशीलिनः कस्मिन् देवते ' विश्वसेत् ' इति सन्देहं भजन्त आसन्निति काश्चन घटनाः बोधयन्ति। विश्वसेद्वा न वा इति सन्दिग्धामवस्थामपनेतुमेव केरलेषु क्षेत्रप्रवेशनाविलम्बराद्याः ऐतिहासिकघटनाः सञ्जानाः इति प्रसिद्धम् । अभारतीयानि मतानि धर्माश्चास्मिन् विश्वासे युक्तेः प्रामाण्यमधिकृत्य न खिन्नाः भवन्ति, यतः तत्तद्धार्मिकाः

ग्रन्थाः तेषां स्वत एव प्रमाणभूताः भवन्तीति सारः ।किन्तु प्राचीनाः भारतीयाः इमं विश्वासं न सम्पूर्णतया विश्वसन्तः आसन्निति दृश्यते । तदुक्तम्-

" लोभप्रमादविश्वासैः पुरुषो नश्यति त्रिभिः ।
तस्माल्लोभो न कर्तव्यः प्रमादो न न विश्वसेत्।
सा श्रिया न मदं कुर्यात् स सुखी तृष्णयोज्झिताः
तन्मित्रं यस्य विश्वासः पुरुषः स जितेन्द्रियः ।। " इति। [५] ननु प्रथमे श्लोके विश्वासः निन्द्यते द्वितीये तु कीर्त्यत इति विरोध एवेति चेन्न, यतोऽन्यस्मिन् श्लोके एवमप्युच्यते -

न विश्वसेदविश्वस्तं मित्राञ्चापि न विश्वसेत् ।
कदाचित्कुपितं मित्रं गुप्तदोषं प्रकारयेत् ।। इति[६]

अत एव पूर्वस्मिन् श्लोके मित्रपरविश्वासप्रतिपादके यो विश्वासः निरूपितः तेन तात्कालिकविश्वासाय योग्यं मित्रम् इत्येवार्थः कल्पनीयः । विश्वासस्यामाप्यत्वं निरन्तरपरिणामित्वं बाध्यत्वं च ईदृशायाविश्वासाय प्राचीनां प्रचोदयामास । ईदृशी लौकिकस्य विश्वासस्तस्य कथा इत्यलम् । आत्मीय अपि विश्वासः विचारणीय एव । अध्यात्मप्रकरणे अधिदैवप्रकरणे वा ' विश्वास' पदं भारतीयैर्न सामान्येन प्रयुक्तम् । यत् यावन्न साक्षादनुभोक्तुं शक्यते तदेवे विश्वासाय कल्पत इति प्रसिद्धम् । भारतीयानां तु आत्मा ईश्वरो वा साक्षादनुभववेद्यः ' तत्त्वमसि ' [७], ' अहं ब्रह्मास्मि' [८], इत्यादिभिः श्रुतिभिः प्रसिद्धश्च भवति । "जाग्रत्स्वप्नसुषुप्तिषु स्फुटतराया संविदुज्जृम्भते, या ब्रह्मादिपिपीलाकान्ततनुषु प्रोता जगत्साक्षिणि, सैवाहं न च दृश्यवस्त्विति दृढप्रज्ञा" [९] इति आचार्यभगवत्पादैः मनीषापञ्चके प्रस्तूयते । तस्याः संविदः साक्षात्कार एव ईश्वरसाक्षात्कार इति भारतीयमतम्। अत एव भारतीयानां न ईश्वरे आत्मवस्तुनि वा 'विश्वासः' वर्तते । "गुरूपदिष्टवेदान्तवाक्येष विश्वासः " [१०] इति क्वचिदिदं पदं अध्यात्मप्रकरणेषु विचारविषयीकृतमेव । किन्त्वत्र या 'श्रद्धा' इति विशिष्यते तस्याः विशेषणत्वेनैव विश्वासपदं स्वीकृतम् । कठोपनिषदि या श्रद्धा नचिकेतसः वर्ण्यते तत्र तस्य पदस्य 'आस्तिक्यबुद्धिः' आचार्यभगवत्पादैः निबद्धः । 'शास्त्रार्थे दृढप्रत्ययः' इति कोशेषु श्रद्धा प्रस्तूयते । भगवद्गीतास्वपि

"त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा
सात्विकी राजसी चैव तामसी चेति तां श्रुणु " ।।[१२]

इतीमां श्रद्धां वर्णयति। चित्तप्रसाद एव श्रद्धेति पातञ्चलयोगभाष्येव्यासभगवतोक्तम् । एवं भारतीयाः 'विश्वास'पदं विहाय श्रद्धेतीमं पदं समध्याहृता इति सिद्धम् । तथा चेदुपर्युक्ते वेदान्तसारगते वाक्ये यो वा ' गुरूपदिष्टवेदान्तवाक्येषु विश्वासः ' इत्युक्तः तस्य विश्वासस्य तात्पर्यं किमिति सन्देहो जायेत । अत्रोच्यते -गुरुणा उपदिष्टानि वेदान्तवाक्यानि इह विश्वसनीयानि इत्यवधार्यन्ते । न वेदान्तवाक्यानि अविचार्यावधेयानि । वेदान्तवाक्यानां तात्पर्यं उपक्रमोपसंहाराभ्यासापूर्वताफलार्थवादोत्पत्तिभिः षड्विधलिङ्गैः परीक्ष्यैवावधेयानि । स्थूणानिखननन्यायेन वाक्यार्थदार्ढ्यायैवेवं श्रवणस्य विधिः । अत एव तादृशी श्रद्धा नाम वेदान्तवाक्यगतायाः युक्तिभद्रतायाः अविचलितमवधानमेवेति बोध्यम् । अत एव क्रैस्तवेस्लामिकप्रभृतिषु मतेषु यत् विश्वासपदं व्यवह्रियते, तेन श्रद्धेति पदस्य महान् भेदो वरीवर्तत इति समवगम्यते। वर्तमानकाले यद्यपि युक्तेः विश्वासस्य च मिथः न तादृशः भेदः स्यादिति वक्तव्यम् । सेयं श्रद्धा कालेऽस्मिन् सनातनधर्मानुशीलिनां मध्येऽपि 'विश्वासः' इति व्यवहारतामापाद्य प्रचाल्यमाना भवति । यथा भगवद्गीतासु प्रतिपादितम् तथा सत्त्वादिगुणभेदप्रभेदैः प्रविभज्य त्रयस्त्रिंशत्कोटिशः समुपास्यन्ते। यत इयं श्रद्धा वेदान्तवाक्ययुक्तिभिरनवगता तत एव कोटिशो विभज्यानिन्दियवेद्यत्वञ्चारोप्य 'विश्वासाय' कल्पयामास । कोटिशः प्रविभक्तेयं श्रद्धा यदा साधकैरैक्यज्ञानस्य तलेऽवगम्यते तक्षाऽभेदं समवगम्य विश्वासं विहायाभेदधियमालिङ्गते । श्रद्धा युक्तियुक्तोपि हेतोः भेदा- तस्यां न वरीवर्तन्ते ।

युक्तिविश्वासयोर्मध्ये

युक्तेः विश्वासस्य च वैकारिकी च समता जनपदस्य भौतिकस्य आत्मीयस्य च आनन्दस्य प्रायोजिकी भवति । तदिदं पारस्पर्यं कलानां काव्यादीनाञ्चोत्पत्तेः निदानमभूत् । यदा स्वेच्छाचारिभिः युक्तिविश्वासयोः पारस्पर्यं स्वीयलाभाय वक्रीकृतमभूत् । तदा तयोर्मिथः मिथ्यामर्यादाः समारोपिताः । पश्चाद्भवैः इमौ द्वावपि विरुद्धयोर्ध्रुवयोः प्रतिष्ठिताभवत् । अस्याः स्खलितप्रतिष्ठायाः करणत्वेन भौतिकशास्त्रं प्रयोजयामास । तत्र युक्तेःस्थानं भौतिकशास्त्रेणापहृतमभूत् । तथा चित्रवर्णराजिभिः प्रशोभमानः युक्तेः

प्रपञ्चः विवर्णः एकशिलात्मकश्चाभवत्। याः भावनाः भौतिकशास्त्रेणासम्मताः ताः सर्वाः अपि मूढभावनाः एवेति प्रक्षिप्ताः । भौतिकशास्त्रस्य वैचारिकभूमामेवं युक्तिरिति; तथा मानवस्य वैकारिकचेतनासु युक्तिहीनतैवेति च ते प्रतिपादयामासुः ।

एवं वेदेतिहासपुराणादीन् भौतिकशास्त्रसम्मतान् विधातुं तद्वक्तॄणां प्रयत्नः समारब्धः । ये पौराणिकाः आध्यात्मिकाः वा अंशाः आरायाः वा भौतिकशास्त्रेणाल्पमपि समनुगृहीताः भवन्ति तानंशान् जनपदमध्ये संस्थाप्य सप्रमाणान् प्रदर्शयितुं कैश्चित् प्रौढताऽनुभूयते। तेषां तु युक्तिर्नाम भौतिकशास्त्रयुक्तिरेवेति भावना । तस्यां भावनायां संरूढायां तु नेहाध्यात्मिकी युक्तिः किन्तु शास्त्रयुक्तिरेवेति स्खलितः कश्चन न्यायोऽपि समजानि ।

भौतिकशास्त्रः साङ्केतिकविद्या च

युक्तेः आश्रयभूतः भौतिकशास्त्रः विकासशीलः वर्तत इति तन्मतानुयायिनां वादः । अस्य प्रपञ्चस्य परिणामः शास्त्रस्य विकासशीलेन परिणामेनैते उत्प्रेक्षन्ते । किन्तु शास्त्रः विकसते वा न वेति प्रश्नः चिन्तकमण्डले इतः पूर्वमेव समुत्पन्नाः प्रायः सर्वैः शास्त्रः साङ्केतिकविद्या च युगपदवतार्यते । तत्र शास्त्रः सैद्धान्तिकः साङ्केतिकविद्या प्रायोगिकी चेति भेदः विचारणीयः । अनयोः साङ्केतिकविद्यैव जवेन विकसन्तीति दृश्यते । विख्यातः शास्त्रज्ञः सी.वी. रामन् महाभागाः एवं अभिप्रयन्ति - "शास्त्रीयानि परीक्षणानि द्विधा विभज्यन्ते; सैद्धान्तिकानि परीक्षणात्मकानि चेति । एक्स्-रे विद्यायाः सिद्धिः परीक्षणात्मकस्य दृष्टान्तः भवति । किन्तु माक्स् प्लाङ्क् महोदयस्य क्वान्टं भौतिकेन सम्बद्धः आशयः सैद्धान्तिकः भवति । "[१३] सिद्धान्ताः समग्राः पूर्णाश्च भवन्ति इत्यतः तेषां विकासपरिणामादयः नानिवार्यतां भजन्ते। परीक्षकस्य शास्त्रज्ञस्य सैद्धान्तिकस्य शास्त्रज्ञस्य च मते प्रेक्षे च विभिन्ने स्याताम् ।

एवंभूतस्य सैद्धान्तिकस्य शास्त्रज्ञस्य कानिचन वैशिष्ट्यानि सन्तीति तज्ज्ञाः वदन्ति ।[१४] तानि त्रिधा क्रोडीकृत्याधीयन्ते - तत्राद्याः शास्त्रज्ञस्य प्रपञ्चसम्बन्धिनी प्रेक्षा द्वितीया शास्त्रगवेषणस्य रीतिः तृतीया शास्त्रीयैरुद्यमैः सम्बन्धाः तत्राद्यायामेतानि निगमनानि भवन्ति ।

१. प्रपञ्चस्य प्रमेयः भवति ।

२. तत्संबद्धाः शास्त्रीयाः आशयाः परिणामिनः भवन्ति ।

३. शास्त्रे प्रापञ्चिकानि वस्तूनि तत्त्वेन प्रतिपाद्यन्ते ।

४. शास्त्राः न कस्यचनाशयस्य पक्षपाती नापि सर्वेषां प्रमाणभूतस्य तृतीयान्तु-

१. शास्त्रीयाः उद्यमाः सङ्कीर्णाः सामूहिकाश्च भवन्ति ।

२. तेषु सामान्यनीतिः धार्मिकता च वर्तते।

३. शास्त्रज्ञस्य उद्यमाः शास्त्रीयं सामान्यजनीनं च प्राधान्यं अर्हन्ति।

एवं शास्त्रे सामान्येन वर्णिते प्रतिपादिते वा नस्य माषकभूतेषु घटकेषु समापन्नाः भेदाः अवर्णनीया एव स्युः । शाखोपशाखाभिः कस्मिंश्चिद्वस्तुन्यधीते तस्य वस्तुनः एकशिलात्मकमिव निर्वचनसाध्यं अयुक्तिकं च भवेत् । अनिर्वाच्यं इमं प्रपञ्चं तादृशे कस्मिंश्चिन्निर्वचने दमयितुं प्रवर्तमानः शास्त्रज्ञोऽपि मूर्ख एवेति प्रसिद्धानां मतम् ।

अत एव शास्त्रेण विश्वासं श्रद्धां वा मापयितुं शक्यते वा न वेति प्रश्नः समुदेति । यावद्विश्वासश्रद्धादिकं भौतिकशास्त्रपरीक्षणशालागतोपकरणैर्निरूपयितुंन शक्यते तावत्तत् शास्त्रीयताविरुद्धमिति आक्षिप्यते । ये भौतिक्या सत्तयात्रः दृश्यन्ते लभ्ते वा ते तच्छास्त्रीयपरीक्षणशालागतेषू पकरणेषु निरूपणाय योग्याः भवन्ति । परन्तु यदौतिकीं सत्तामतिरिच्य सत्तान्तरेऽभौतिकेऽनुभूयन्ते तद्भौतिकशास्त्रस्य परीक्षणशालासु नात्मान्ं प्रदर्शयन्ति । अतस्तादृशवस्तु लोके न वर्तन्त इति शास्त्रीयं निगमनं साधुवेति प्रश्नश्च साकमुदेति । भौतिकसत्ताविरहैः सङ्कल्पैरेव लोके व्यवहारः सम्भवति । कस्यचन पत्राखण्डस्य २००० रूप्यकाणीति सत्ता न क्वापि भौतिकी; किन्तु भावनाजन्यैव । २०००रूप्यकाणां मूल्यं सर्वकारैः हीयते चेत्तत्र केवलः पत्रखण्ड एवावशिष्यत; न तु रूप्यकाणि । रूप्यकाणां मूल्यं कस्मिंश्चिद्विश्वासे श्रद्धायामेवावतिष्ठते । एवं सर्वान्यपि भौतिकानि वस्तूनि विश्वासे श्रद्धायां वैव वरीवर्तन्ते । अतः युक्तयोऽपि श्रद्धाविश्वासयोरन्यतरे लब्धजन्मान एवेति प्रदिपादयितुं शक्यते । तथा चेत् "विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतम्, पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया..."[५] इति वेदान्तवाक्यं सुचिन्तनीयतामावहतीति वक्तव्यम् ।

अतः शास्त्रः विश्वासः श्रद्धा च अनुभूतेः तलेषु भेदान् भजन्त इति बोध्यम् । शास्त्रः भौतिकं, श्रद्धाविश्वासौ अतिभौतिकं वस्तु च प्रतिपादयन्ति । अतः 'युक्तिपदं'न केवलं भौतिकशास्त्रे अपि तु श्रद्धाविश्वासयोरपि प्रयोक्तव्यम् । यतः भौतिकस्य मापकदण्डेनाभौतिकस्य मापनमयुक्तिकं कर्म । अभौतिकस्य व्यापारमण्डलेषु भौतिकशास्त्रयुक्त्यनुप्रवेशस्तु यादृच्छिक एव स्यात् । किन्तु तादृशैर्गोणैर्न्यिवचनैरभौतिकं वस्तु भौतिकतयानुभूयमानमिति निर्णेतुं न शक्यते । अतिभौतिकेषु प्रयुज्यमानाः भौतिकयुक्तयः प्रतिहेतुभिः कलुषिताः भवन्ति । अत एव शास्त्रस्य गतिं श्रद्धायाः गतिञ्च न पारस्पर्येण गृह्णीयादिति संगृह्यते। यथा भौतिकशास्त्रापतितानि कापटचानि परिहर्तुं तच्छास्त्रगताः युक्तयः प्रविधयश्चोपयुज्यन्ते तथा श्रद्धाविश्वासयोरापन्नाञां कापट्यानां परिहाराय तद्गताः प्रमाणप्रमेयविचारक्रमाः उपयुज्यन्ते । ते अपि तर्कयुक्तिभिः तन्त्रयुक्तिभिश्च समनुगृहीतं भवति । यथा माधुर्यं न श्रोत्रेणानुभूयते तथा अतिभौतिकं न भौतिकयुक्त्या संशोद्यते । युक्तिस्तु भौतिकाभौतिकयोरुभयोरपि प्रयोक्तव्या भवतीत्यतः विश्वासः श्रद्धा वा न युक्तिहीना किन्तु अभौतिकयुक्तियुतेति विमर्शः पुरस्क्रियते।

ग्रन्थसूचिः

1. https://plato.stanford.edu/entries/aristotle-logic/
2. मानमेयोदयः। प्रमाणभागे अनुमानपरिच्छेदः ।
3. शब्दकल्पद्रुमः
4. वाचस्पत्यं पृ.4778
5. गरुडनीतिसारः 115
6. चाणक्यनीतिः
7. छान्दोग्योपनिषत्
8. बृहदारण्यकोपनिषत्
9. मनीषापञ्चकम्
10. वेदान्तसारः
11. शब्दकल्पद्रुमः
12. भगवद्गीता
13. The Scientic Outlook, Dr.C.V. Raman
14. Essay : What is Science ? Defining Science by the Number. 1920-2000,ecsiic.ca/pdf/Godin_35.pdf
15. श्रीदक्षिणामूर्तिस्तोत्रम्